# स्वाध्यायः

# दिनद्वयात्मिका छात्रशिल्पशालारूपरेखा

**Government of Kerala**

**General Education Department**

# आमुखम्

केरलसर्वकारीणशिक्षाविभागेन संस्कृतछात्राणां कृते दिनद्वयात्मिका **स्वाध्यायनामिका** छात्रशिल्पशाला प्रचाल्यते। छात्राणां संस्कृतभाषा कौशलं प्रवर्धयितुम् इयमुपकारिका भवेत्। शुद्धभाषाप्रयोगसामर्थ्यं विभक्त्यवबोधः, सामान्यव्याकरणपरिज्ञानं, भाषाव्यवहारसामर्थ्यं इत्यादीनि अनया लक्ष्यीक्रियन्ते। पठनानुबन्ध प्रवर्तनानाम् अङ्गतया एतादृशानि प्रवर्तनानि विद्यालयेष्वपि कर्तुं शक्यन्ते। तदर्थमपि अत्र प्रवर्तनानि योजितानि। विद्याभ्यासउपमण्डलानुसारिणी एव शिल्पशाला आयोजिता वर्तते। वर्गचालनात् पूर्वस्मिन् दिने समीचीनरीत्या वर्गासूत्रणं कार्यम्। अत्रस्थानि प्रवर्तनानि निरीक्ष्य तानि, तादृशानि वा स्वकीये विद्यालयेऽपि आयोजयितुम् अध्यापकाः समर्थाः भवेयुः इत्यतः शिल्पशालायाम् अस्याम् उपमण्डलस्थाः सर्वे संस्कृताध्यापकाः सन्निहिताः भवेयुः। अध्यापकैः एव वर्गः चालनीयः। प्रत्युपमण्डलं परमतः द्विशतं (२००) छात्राः भागभाजः भवितुमर्हन्ति।

विज्ञानस्य विनोदस्य च समन्वयनेन विद्यालयेषु संस्कृतवातावरणं कल्पयितुम् अनया शिल्पशालया शक्येत इति प्रतिपाल्यते।

## उद्देश्यानि

- छात्राणां संस्कृतपठने तात्पर्यवर्धनम्
- संस्कृतसम्भाषणकौशलसम्पादनम्
- सामान्यसंस्कृतव्याकरणज्ञानसम्पादनम्
- सप्तविभक्तीनां सामान्यज्ञानं, कालबोधः अव्ययानां प्रयोगसामर्थ्यं संख्याज्ञानम् इत्यादीनां सम्पादनम्।

## निर्देशाः

- शिल्पशालायाः समयः प्रातः ९.३० तः सायं ४.३० पर्यन्तं भवति।
- समयनिष्ठा सर्वैः पालनीया।
- २०१३ आगस्तमासस्य ३१ तम दिनाङ्कात् पूर्वं शिल्पशाला आयोजनीया।
- शिल्पशालायां परमतः २०० छात्राः भवितुमर्हन्ति।
- सर्वेभ्यः विद्यालयेभ्यः छात्राः भागभाजः भवन्ति इति निर्णयः कार्यः।
- उपजिल्लायाः अध्यापकाः एव तत्र वर्गं चालयन्तु।
- उपजिल्ला संस्कृतकौण्सिल् योगे शिल्पशालायाः आसूत्रणं यथाविधि कार्यम्।

| | | |
|---|---|---|
| 9.30 to 10.00<br>**प्रथमसत्रम्** | **प्रथमम् दिनम्**<br><br>उद्घाटनकार्यक्रमः<br><br>(अर्धघण्डाभ्यन्तरे समापयति) उपजिल्लायाः व्यवस्थानुसारम् आयोजनम्। | |
| 10.10 - 10.45 | पाठयेम संस्कृतम् इति गीतं संघशः आलपनम्। संघरूपीकरणं तथा शिल्पशालाविषये उपोद्घात कथनम्।<br><br>सूचनाः-<br><br>पूर्वस्मिन् दिने एव संघीकरणार्थं सिद्धता कार्या। पञ्जीकरणसमये तादृशी रेखा दातव्या। अस्मिन् स्वाध्याये २०० छात्राणाम् उपस्थितिं प्रतिपालयामः। छात्राणां संख्यानुसृतं संघान् कृत्वा एकैकस्य संघस्य प्रत्येकं स्थानं निर्दिशति। एकस्मिन् संघे ३०-४० छात्राः भवितुमर्हन्ति। प्रत्येकं संघस्य एकमध्यापकं नेतृरूपेण निश्चिनोतु। संघस्य नाम अपि दातव्यम्। | गीतगङ्गायाः पाठयेम संस्कृतम् इति गीतम्। |
| 10.50 - 11.50 | स्वपरिचयः - संघानुसारम्<br><br>छात्राः स्वनाम, विद्यालयस्य नाम, कक्ष्यायाः नाम, ग्रामस्य -गृहस्य पित्रोः च नाम स्वयं वदेयुः<br><br>एतदर्थम् पाढ्यबिन्दवः<br>- मम नाम ......<br>- भवतः नाम ..................<br>- भवत्याः नाम ......................<br>- अहं, भवान्, भवती ...................<br>- अस्ति - नास्ति | पञ्चम कक्ष्यायाः अभिज्ञापत्रम् |

| | | |
|---|---|---|
| 11.55-12.55 | शिशुगीतम् - विमानयानम् रचयाम<br><br>राघव! माधव! सीते! ललिते!<br>विमानयानं रचयाम।<br>नीले गगने विपुले विमले<br>वायुविहारं करवाम।। (१)<br><br>उन्नतवृक्षं तुङ्गं भवनं<br>क्रान्त्वाकाशं खलु याम।<br>कृत्वा हिमवन्तं सोपानं<br>चन्दिरलोकं प्रविशाम ।।(२)<br><br>शुक्रश्चन्द्रः सूर्यो गुरुरिति<br>ग्रहान् हि सर्वान् गणयाम।<br>विविधाः सुन्दरताराश्चित्वा<br>मौक्तिकहारं रचयाम।। (३)<br><br>अभ्बुदमालाम् अम्बरभूषाम्<br>आदायैव हि प्रतियाम।<br>दुःखित-पीडित-कृषिकजनानां<br>गणेषु हर्षं जनयाम।। (४)<br><br>क्रियापदानां परिचयः<br><br>गच्छति, पठति, लिखति.... (साभिनयं क्रियापदानां पाठनम्)<br><br>(पतति, क्रीडति, वदति, पिबति, लिखति, नमति, पृच्छति, भवति, मिलति, चलति, करोति, श्रृणोति, भजते, वन्दते, मोदते, शोभते)<br><br>(पुरुषवचनानि परिचायनीयानि)<br><br>उदाः- बालः गच्छति    बालौ गच्छत;    बालाः गच्छन्ति<br>त्वं गच्छसि    युवां गच्छथः    यूयं गच्छथ<br>अहं गच्छामि    आवां गच्छावः    वयं गच्छामः | |

| | | |
|---|---|---|
| 12.55 - 1.30 | भोजनवेला | |
| 1.30 - 2.30 | **पदपरिचयम्**<br><br>क्रीडाद्वारा सत्रस्य आरम्भः। अध्यापकः आरम्भे अकारान्त पुल्लिङ्गशब्दमेकं वदतु तथा एकैकः छात्रः तदनुसारम् अकारान्तपुल्लिङ्गशब्दं वदतु। एवमेव आकारान्तस्त्रीलिङ्ग -इकारान्त उकारान्त पुल्लिङ्ग ईकारान्त स्त्रीलिङ्गशब्दान् वाचयतु। अनन्तरम् अध्यापिका छात्राणां हस्तात् वस्तूनि स्वीकर्तुं 'कृपया लेखनीं ददातु, पुस्तकं ददातु, स्यूतं ददातु' इत्यादि सूचयेत्। एतादृशप्रयोगेण द्वितीयाविभक्तिबोधनं करोतु।<br><br>बालकः ग्रन्थं पठति।<br>अध्यापिका कथां लिखति।<br>बालः जलं पिबति।<br>अनन्तरं शब्दानां द्वितीया बोधनाय प्रयत्नः भवतु।<br>अङ्कनी, मापिका, सुधाखण्डः, कृष्णफलकम्, नदी<br>उदाः- अङ्कनी - अङ्कनीम्<br>सुधाखण्डः - सुधाखण्डम्<br>एवम् सर्वासां विभक्तीनां परिचायनावसरे एतादृशं प्रवर्तनम् अनुवर्तनीयम्।<br>अभ्यासः- सुभाषितम्<br>रामं दशरथं विद्धि<br>मां विद्धि जनकात्मजाम्।<br>अयोध्यामटवीं विद्धि<br>गच्छ तात यथासुखम्।। | चार्ट् पत्रे पदानि लिखित्वा प्रदर्शयतु<br><br>विभक्तिवल्लरी पुस्तकम्<br><br>चार्ट् |

| | | |
|---|---|---|
| 2.35 - 3.35<br>तृतीया - चतुर्थी<br>विभक्तिः | **चार्ट्पत्रे लेखनाय**<br><br>അതെന്നു പ്രഥമയ്ക്കർത്ഥം, ദ്വിതീയക്കതിനെ പുനഃ<br>അതിനോടതിലേക്കെന്നും ദ്വിതീയക്കർത്ഥമായ് വരും<br>തൃതീയാ ഹേതുവായിക്കൊണ്ടാലോടൂടേതി ച ക്രമാത്<br>ആയിക്കൊണ്ട് ചതുർത്ഥീ ച സർവ്വത്ര പരികീർത്തിതാ<br><br>विभक्तिपरिचयः<br>अध्यापिका एकां कथाम् उक्त्वा कक्ष्यायाः आरम्भं करोतु। अनन्तरं साभिनयम् वदतु - यथा<br>दण्डः आस्ति - दण्डेन सूचयामि।<br>मापिका आस्ति - मापिकया अङ्कनं करोमि<br>पुस्तकं ____________<br>लेखनी ____________<br>एतादृशानि पञ्चषाणि उदाहरणानि सूचनीयानि। एवं भावसूचिका यथा -<br>बालिका सन्तोषेण गायति।<br>रमेशः आदरेण पश्यति।<br>(धैर्यः, असूया, लज्जा, विजयः)<br>✦ सह - अलं योगे तृतीया विभक्तिः<br>✦ विना - योगे द्वितीया तृतीया च भवेत्। | कथाकदम्बम् इति पुस्तकात् स्नेहः इति कथा<br>Page No.25 |

| | | |
|---|---|---|
| | अक्रोधेन जयेत् क्रोधम्<br>असाधुं साधुना जयेत्।<br>जयेत् कदर्पं दानेन<br>जयेत् सत्येन चानृतम्।।<br><br>दानेन पाणिर्न तु कङ्कणेन<br>स्नानेन शुद्धिर्न तु चन्दनेन।<br>मौनेन तृप्तिर्न तु भोजनेन<br>ज्ञानेन मुक्तिर्न तु मुण्डनेन।।<br><br>सुभाषिते विद्यमानानि तृतीया विभक्तिरूपाणि परिशीलयन्तु। अध्यापिका सज्जीकृतवस्तुभ्यः एकैकं स्वीकृत्य छात्रेभ्यः दत्त्वा एवं वदतु - यथा<br>अहं रमायै चाकलेहं ददामि।<br>अहं रमेशाय पुस्तकं यच्छामि।<br>एवं चतुर्थी विभक्तिं उपस्थापयति।<br><br>रुच्यर्थधातूनां, क्रुधादीनां च प्रयोगे चतुर्थी भवति<br><br>सुभाषितम्<br>विद्या विवादाय धनं मदाय<br>शक्तिः परेषां परिपीडनाय।<br>खलस्य साधोर्विपरीतमेदत्<br>ज्ञानाय दानाय च रक्षणाय।। | |

| | | |
|---|---|---|
| 3.45 - 4.15<br>**क्रीडा** | **भाषाक्रीडा - अन्ताक्षरी**<br><br>शिक्षकः आरम्भे एकं शब्दं वदतु - यथा - **बालकः**, अनन्तरं एकैकः छात्रः तस्य शब्दस्य अन्त्यानुसारं नूतनं शब्दं वदतु। अकारान्तपुल्लिङ्ग शब्दमेव आरम्भे कारयतु। अनन्तरम् अन्तपरिवर्तनम् कृत्वा (अकार-ईकार - ऊकारान्त) क्रीडाम् अनुवर्ततु। | |
| 4.15 - 4.30 | **अवलोकनम्**<br><br>प्रथमदिनस्य परिशीलनस्य अवलोकनम् तथा वाक्यकथनम्। वाक्यानि, कथा, कविता, गीतम् वा लिखित्वा आनयनार्थं सूचनीयाः। | |

| | | |
|---|---|---|
| 9.30 to 10.30<br>**प्रथमसत्रम्** | <u>द्वितीयम् दिनम्</u><br><br>संघे उपविश्य छात्रैः गृहपाठरूपेण लिखितानि पुटानि स्वीकृत्य सम्पुटनिर्माणम् भवतु। तदर्थम् एकः नियोक्तव्यः।<br><br>भूतकालक्रिया -लङ्<br><br>एकं बहिः प्रेषयित्वा अध्यापकः **सः अगच्छत्, सः आगच्छत्** एवम् उपस्थापयति।<br>पठति - अपठत्<br>भवति - अभवत्<br>उत्तिष्ठति - उदतिष्टत्<br>उपविशति - उपाविशत्<br>✧ उपसर्गयोगे धातोः अर्थभेदाः सूचनीयाः।<br><br>उपसर्गात् धात्वर्थो बलादन्यत्र नीयते<br>प्रहाराहारनीहार संहारपरिहारवत्<br><br>भविष्यकालः - लृट्<br><br>पठति अपठत् पठिष्यति<br>भवति अभवत् भविष्यति<br>पश्यति अपश्यत् द्रक्ष्यति<br>एवं गणे लङ् लृट् लकाराभ्यासः वाक्यकथनेन कार्यः। (लोट् - विधिलिङ् च) | चार्ट् पत्रे लिखित्वा प्रदर्शयतु। |

| | | |
|---|---|---|
| 10.35 to 11.05<br><br>15 - 12.45 | **कथावाचनम्**<br>अनुबन्धे दत्तां कथां वाचयित्वा तत्रोपयुक्त क्रियापदानां लकारान् विवेचयतु<br>**पञ्चमी - षष्ठी - सप्तमी**<br>**विभक्तीनाम् अर्थबोधनम् प्रयोगश्च**<br>अध्यापकः हस्ते किमपि वस्तु प्रदर्शयति। तत् अधः पातयित्वा साभिनयम् उपस्थापयतु।<br>उदा - सुधाघण्डः हस्तात् पतति।<br>अहं गृहात् आगच्छामि।<br>पाकशालायाः सुगन्धः प्रसरति।<br>नद्याः जलम् आनयतु।<br>मन्त्री श्वः विदेशात् आगमिष्यति।<br>एवम् अभ्यासं कृत्वा पाठयतु।<br>● भयार्थे - रक्षार्थे - बहिः - आरभ्य- पूर्वम्-परम् अत्रापि पञ्चमी विभक्तिः भवति<br>सुभाषितम् -<br>क्रोधात् भवति संमोहः<br>संमोहात् स्मृतिविभ्रमः।<br>स्मृतिभ्रंशात् बुद्धिनाशः<br>बुद्धिनाशात् प्रणश्यति।। | अनुबन्धं - १ |

षष्ठी

सामूहिकरीत्या एकस्य सुभाषितस्य आलपनेन उपस्थापनम्

हस्तस्य भूषणं दानम्
सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणम् शास्त्रम्
भूषणैः किं प्रयोजनम्।।

एवम् अन्यशब्दानां वाक्यानां च अभ्यासः भवतु (आकारान्त स्त्रीलिङ्ग - ईकारान्तस्त्री - ईकारान्त-उकारान्तपुलिङ्गः)

पुरतः, पृष्ठतः, उपरि, अधः, वामतः,दक्षिणतः, अन्त इत्यादीनां प्रयोगे षष्ठी विभक्तिः भवति।

सप्तमी विभक्तिः

लेखनी हस्ते अस्ति।

छात्राः कक्ष्यायां सन्ति।

पाठशालायां भोजनं विद्यते।

नद्यां मीनः अस्ति।

सुभाषितम्

उत्सवे व्यसने चैव
दुर्भिक्षे प्राणसङ्कटे।
राजद्वारे श्मशाने च
यस्तिष्ठति स बान्धवः।।

| | | |
|---|---|---|
| | അതിൽനിന്നതിനേക്കാളും ഹേതുവായിട്ട് പഞ്ചമീ<br>ഇക്കുമിന്നുമുടെ ഷഷ്ഠിക്കതിന്റെ വെച്ചുമെന്നപി.<br>അതിങ്കലതിൽവെച്ചെന്നും വിഷയം സപ്തമീ മതാ.<br><br>**सप्तविभक्ति परिचायकं श्लोकम्**<br><br>**रामो राजमणिः सदा विजयते**<br>**रामं रमेशं भजे**<br>**रामेणाभिह्ता निशारचरचमू**<br>**रामाय तस्मै नमः।**<br>**रामान्नास्ति परायणं परतरं**<br>**रामस्य दासोस्म्यहम्**<br>**रामे चित्तलयः सदा भवतु मे**<br>**हे राम मामुद्धर।।** | |
| 12.45-1.30 | **भोजनवेला** | |
| 1.30 - 2.30 | **प्रश्नवाचकशब्दानां परिचायनम्**<br>**क्त्वान्त - ल्यबन्त - तुमुन्नन्त अभ्यासः** | |

| | | |
|---|---|---|
| | **प्रश्नवाचककेलि**<br>किम्, कुत्र, कदा, कति, कुतः कथम्, किमर्थम्, कः, का एतानि उपयुज्य मिथः प्रश्नोन्तरकेलिः युगलं कृत्वा अभ्यासः भवतु। अनुबन्धे दत्तस्य अभ्यासपत्रस्य प्रतिकृतिं (Xerox) कृत्वा उपयोगं करोतु। अनन्तरम् अध्यापकः पुनः परिशीलयतु।<br>सः पठति गच्छति - सः पठितुं गच्छति<br>सः विद्यालयं गच्छति पाठं पठति - सः विद्यालयं गत्वा पाठं पठति<br>सः पाठं पठितुं विद्यालयं गच्छति<br>एवम् अनुवर्तनम्। | अनुबन्धं - २ |
| 2.30 - 3.30 | **सामूहिकम्**<br>एकः अध्यापकः स्वाध्यायवर्गेण किमधीतम् इति छात्रान् स्मारयति। भाषावृद्धिः प्राप्तः, शब्दपरिचयः, निरर्गलता, शुद्धता, शैली च सामान्यतया प्राप्ताः। इतोऽपि भाषावृद्धिः भवेत्। तदर्थं स्वाध्यायः अनुवर्तनीयः। एवम् उक्त्वा छात्राणां सर्गात्मकरचनार्थम् अवसरं ददातु। रचिताः क्रोडीकृत्य सम्पुटं प्रकाशयतु। | अनुबन्धं - ३ |
| 3.30 - 4.00 | **समापनमेलनम्**<br>समापनमेलनम् उपमण्डलस्य व्यवस्थानुसारं कुर्वन्तु।<br>तत्र एते अंशाः भवेयुः<br>१. एकः छात्रः बालप्रबोधनं पठतु<br>२. सुभाषितानाम् अवतरणम् अपि छात्राः कुर्वन्तु । (सर्वविभक्तीनाम्) | |